# कावेर्यष्टोत्तरशतनामानि

{॥ कावेर्यष्टोत्तरशतनामानि ॥}

ॐ अनन्त-गुण-गम्भीरायै नमः ।

ॐ अर्कपुष्कर-सेवितायै नमः ।

ॐ अमृतस्वादु-सलिलायै नमः ।

ॐ अगस्त्यमुनि-नायक्यै नमः ।

ॐ आशान्त-कीर्ति-तिलकायै नमः । ५।

ॐ आशुगागम-वर्द्धिन्यै नमः ।

ॐ इतिहास-पुराणोक्तायै नमः ।

ॐ ईतिबाधा-निवारिण्यै नमः ।

ॐ उन्मत्तजन-दूरस्थायै नमः ।

ॐ ऊर्जितानन्द-दायिन्यै नमः । १०।

ॐ ऋषिसङ्घ-सुसंवीतायै नमः ।

ॐ ऋणत्रय-विमोचनायै नमः ।

ॐ लुप्त-धर्म-जनोद्धारायै ल्

ॐ लूनभाव-विवर्जितायै नमः ।

ॐ एदिताखिल-लोकश्रियै नमः । १५।

ॐ ऐहिकामुष्मिक-प्रदायै नमः ।

ॐ ओङ्कारनाद-निनदायै नमः ।

ॐ ओषधीकृत-जीवनायै नमः ।

ॐ औदार्यगुण-निर्दिष्टायै नमः ।

ॐ औदासीन्य-निवारिण्यै नमः । २०।

ॐ अन्तःकरण-संसेव्यायै नमः ।

ॐ अच्छ-स्वच्छ-जलाश्रयायै नमः ।

ॐ कपिलाख्य-नदी-स्निग्धायै नमः ।

ॐ करुणा-पूर्ण-मानसायै नमः ।

ॐ कावेरी-नाम-विख्यातायै नमः । २५।

ॐ कामितार्थ-फल-प्रदायै नमः ।

ॐ कुम्बकोण-क्षेत्र-नाथायै नमः ।

ॐ कौतुकप्रथम-प्रभायै नमः ।

ॐ खगराज-रथोत्साह-रङ्गस्थल-सुशोभितायै नमः ।

ॐ खगावळि-समाक्रान्त-कल्लोलावळि-मण्डितायै नमः । ३०।

ॐ गजारण्य-सुविस्तीर्ण-प्रवाह-जनमोहिन्यै नमः ।

ॐ गायत्र्याख्य-शिला-मद्ध्यायै नमः ।

ॐ गरुडासन-भक्तिदायै नमः ।

ॐ घन-गम्भीर-निनद-निर्जरप्राप्त-निर्झरायै नमः ।

ॐ चन्द्रपुष्कर-मध्यस्थायै नमः । ३५।

ॐ चतुरानन-पुत्रिकायै नमः ।

ॐ चोलदेस-जनोद्धार-ग्रीष्मकाल-प्रवाहिन्यै नमः ।

ॐ चुञ्चक्षेत्र-समानीतायै नमः ।

ॐ छद्मदोष-निवारिण्यै नमः ।

ॐ जम्बूद्वीप-सरिच्छ्रेष्ठ-नदी-नद-गरीयस्यै नमः । ४०।

ॐ झङ्कारनाद-संस्पृष्ट-षट्पदाळि-समाकुलायै नमः ।

ॐ ज्ञानैक-साधन-परयै नमः ।

ॐ ज्ञप्तिमात्रर्ति-हारिण्यै नमः ।

ॐ टिट्टिभारावस-व्याज-दिविज-स्तुति-पात्रिण्यै नमः ।

ॐ ठङ्कारनाद-सम्भेद-झर्झरीकृत-पर्वतायै नमः । ४५।

ॐ डाकिनी-शाकिनी-सङ्घनी-वारण-सरित्तटायैनमः ।

ॐ ढक्का-निनाद-वारीण-पार्वतीश-समाश्रितायै नमः ।

ॐ णान्तवाच्य-द्विजाष्टाङ्गयोग-साधन-तत्परायै नमः ।

ॐ तरङ्गावलि-संविद्ध-मृदु-वालुक-शोभितायै नमः ।

ॐ तपस्विजन-सत्कार-निवेशित-शिलासनायै नमः । ५०।

ॐ तापत्रय-तरून्मूल-गङ्गादिभिरभिष्टुतायै नमः ।

ॐ धान्त-प्रमथ-संसेव्य-साम्भ-सान्निध्य-कारिण्यै नमः ।

ॐ दया-दाक्षिण्य-सत्कारशील-लोक-सुभावितायै नमः ।

ॐ दाक्षिणात्य-जनोद्धार-निर्विचार-दयान्वितायै नमः ।

ॐ धन-मान-मदान्धादि-मर्त्य-निर्वर्तन-प्रियायै नमः । ५५।

ॐ नमज्जनोद्धार-शीलायै नमः ।

ॐ निमज्जज्जन-पावनायै नमः ।

ॐ नागारिकेतु-निलयायै नमः ।

ॐ नाना-तीर्थाधि-देवतायै नमः ।

ॐ नारीजन-मनोल्लासायै नमः । ६०।

ॐ नानारूप-फल-प्रदायै नमः ।

ॐ नारायण-कृपा-रूपायै नमः ।

ॐ नादब्रह्म-स्वरूपिण्यै नमः ।

ॐ पराभूत-समस्ताघायै नमः।

ॐ पशु-पक्ष्यादि-जीवनायै नमः।६५।

ॐ पापतूलाग्नि-सदृशायै नमः।

ॐ पापिष्ठजन-पावनायै नमः।

ॐ फणीन्द्र-कीर्तित-कलायै नमः।

ॐ फलदान-परायणायै नमः।

ॐ बहुजन्म-तपो-योग-फलसंप्राप्त-दर्शनायै नमः।७०।

ॐ बाहुरूप-द्विपार्श्वस्थ-स्वमातृक-जलार्थिनां\

कलमक्षेत्र-शाल्यन्न-दान-निर्जित-वित्तपायै नमः।

ॐ भगवत्कृत-संतोषायै नमः।

ॐ भास्करक्षेत्र-गामिन्यै नमः।

ॐ भागीरती-समाक्रन्त-तुलामास-जलाश्रयायै नमः।

ॐ मज्जद्दुर्जन-प्राग्जन्म-दुर्जयांहः प्रमार्जन्यै नमः।७५।

ॐ माघ-वैशाकादि-मास-स्नान-स्मरण-सौख्यदायै नमः।

ॐ यज्ञ-दान-तपः-कर्मकोटि-पुण्य-फल-प्रदायै नमः।

ॐ यक्ष-गन्धर्व-सिद्धाद्यैरभिष्टुत-पदद्वयायै नमः।

ॐ रघुनाथ-पदद्वन्द्व-विराजित-शिलातलायै नमः।

ॐ रामनाथपुरक्षेत्र-कामधेनु-समाश्रितायै नमः।८०।

ॐ लवोदक-स्पर्शमात्र-निर्वण-पद-दायिन्यै नमः।

ॐ लक्ष्मी-निवास-सदनायै नमः।

ॐ ललना-रत्न-रूपिण्यै नमः।

ॐ लघूकृत-स्वर्ग-भोगायै नमः।

ॐ लावण्य-गुण-सागरायै नमः । ८५।

ॐ वह्निपुष्कर-सान्निद्ध्यायै नमः ।

ॐ वन्दिताखिल-लोकपायै नमः ।

ॐ व्याघ्रपाद-क्षेत्र-परायै नमः ।

ॐ व्योमयान-समावृतायै नमः ।

ॐ षट्काल-वन्द्य-चरणायै नमः । ९०।

ॐ षट्कर्म-निरत-प्रियायै नमः ।

ॐ षडास्य-मातृ-संसेव्यायै नमः ।

ॐ षडूर्मि-जित-सोर्मिकायै नमः ।

ॐ सकृत्स्मरण-संशुद्ध-तापत्रय-जनाश्रितायै नमः ।

ॐ सज्जनोद्धार-सन्धानसमर्थ-स्व-प्रवाहिन्यै नमः । ९५।

ॐ सरस्वत्यादि-देवीभिरभिवन्दित-निर्झरायै नमः ।

ॐ सह्यशैल-समुद्भूतायै नमः ।

ॐ सह्यासह्य-जन-प्रियायै नमः ।

ॐ सङ्गमक्षेत्र-सामीप्यायै नमः ।

ॐ स्ववशार्थ-चतुष्टयायै नमः । १००।

ॐ सौभरिक्षेत्र-निलयायै नमः ।

ॐ सौभाग्य-फल-दायिन्यै नमः ।

ॐ संशयाविष्ट-दूरस्थायै नमः ।

ॐ साङ्गोपाङ्ग-फलोदयायै नमः ।

ॐ हरि-ब्रह्मेश-लोकेश\-सिद्धबृन्दार-वन्दितायै नमः । १०५।

ॐ क्षेत्र-तीर्थादि-सीमान्तायै नमः ।

ॐ क्षपानाथ-सुशीतलायै नमः ।

ॐ क्षमातलाखिलानन्द-क्षेम-श्री-विजयावहायै नमः । १०८।

॥ इति कावेर्यष्टोत्तरशत नामावलिः ॥

Encoded and proofread by

N. Balasubramanian bbalu at sify.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Kaveri Ashtottara Shatanamavali Lyrics in Devanagari PDF
% File name : kAverI108naama.itx
% Category : aShTottarashatanAmAvalI
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at sify.com
% Proofread by : N.Balasubramanian bbalu at sify.com
% Latest update : November 28, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [ October 13, 2015 ] at Stotram Website